# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा, नवम्बर/दिसम्बर-२०१६

| | | |
|---|---|---|
| कक्षा- शास्त्री-१ (SEM-1) | प्रश्नपत्र-८ | गुणा: - ७० |
| विषय:- पौरोहित्यम् | CE112 | समय: - ०३ त: ०६ |
| दिनाङ्क: - १४/१२/२०१६ | सन्दर्भग्रन्थ: - दुर्गासप्तशती चण्डिपाठ: मूलमात्रम् | |

**॥ प्रथमान्विति: ॥**

**प्र-१ निम्नाङ्कितेषु श्लोकेषु कयोश्चित् द्वयो: ससन्दर्भं व्याख्या कार्या ।** **०८**

१. मम वैरिवशं यात: कान् भोगानुपलप्स्यते ।
ये ममानुगता नित्यं प्रसादधनभोजनै: ॥

२. यतो हि ज्ञानिन: सर्वे पशुपक्षिमृगादय: ।
ज्ञानं च तन्मनुष्याणां यत्तेषां मृगपक्षिणाम् ॥

३. पञ्चवर्षसहस्राणि बाहुप्रहरणो विभु: ।
तावप्यतिबलोन्मत्तौ व्रियतामिति केशवम् ॥

**प्र-२ कस्यैकस्य वर्णनं कुरु ।** **०८**

१. दुर्गासप्तशत्या: प्रथमचरित्रं ग्रन्थानुसारं वर्णयत ।

२. मधुकैटभवधवर्णनं कुरुत ।

**प्र-३ टिप्पणीं कुरु ।** **०२**

१. ब्रह्मण: स्तुति: ।

२. सुरथो नाम राजा ।

**प्र-४ कयोश्चित् द्वयो: लघूत्तरौ देयौ ।** **०२**

१. प्रथमाध्याये कस्या: देव्या: ध्यानमस्ति ?

२. प्रथमचरित्रे वैश्यस्य किं नाम ?

३. भगवान् हरि: कति वर्षाणि युयुधे ?

४. उर्वी केन परिप्लुता ?

**॥ द्वितीयान्विति: ॥**

**प्र-५ कयोश्चित् द्वयो: ससन्दर्भं व्याख्या कार्या ।** **०८**

१. तत: पराजिता देवा: पद्मयोनिं प्रजापतिम् ।
पुरस्कृत्य गतास्तत्र यत्रेशगरुडध्वजौ ॥

२. वेगेन कांश्चिदपरान्नादेन भ्रमणेन च ।
नि:श्वासपवनेनान्यान् प्लावयामास भूतले ॥

३. प्राच्यां रक्ष प्रतीच्यां च चण्डिके रक्ष दक्षिणे ।
भ्रामणेनात्मशूलस्य उत्तरस्यां तथेश्वरि ॥

**प्र-६ कस्यैकस्य सारांश: लिखत ।** **०८**

१. महिषासुरसैन्यवध: ।

२. तृतीयोऽध्यायस्य विषयवस्तु ।

**प्र-७ एका टिप्पणी कार्या ।** **०२**

१. शक्रस्तुतिः ।

२. दुर्गादेवी ।

**प्र-८ चतुर्षु द्वयोः लघूत्तरौ देयौ ।** **०२**

१. द्वितीयचरित्रस्य विनियोगे कस्याः देव्याः नाम अस्ति ?

२. भुवि के विचरन्ति ?

३. गर्ज गर्ज क्षणं मूढ इति कस्य वचनं वर्तते ?

४. शक्रादयस्तुतिः कस्मिन् अध्याये विद्यते ?

**॥ तृतीयान्वितिः ॥**

**प्र-९ कयोश्चित् द्वयोः ससन्दर्भं व्याख्या कार्या ।** **१०**

१. ततोऽम्बिका परं रूपं बिभ्राणां सुमनोहरम् ।
दुदर्श चण्डो मुण्डश्च भृत्यौ शुम्भनिशुम्भयोः ॥

२. चुकोप दैत्याधिपतिः शुम्भः प्रस्फूरिताधरः ।
आज्ञपयामास च तौ चण्डमुण्डौ महासुरौ ॥

३. शक्त्या जघान कौमारी वाराही च तथासिना ।
माहेश्वरी त्रिशूलेन रक्तबीजं महासुरम् ॥

**प्र-१० कस्यैकस्य वर्णनं कुरु ।** **१०**

१. निशुम्भवधनाम नवमोऽध्यायः ।

२. शुम्भवधो नाम दशमोऽध्यायः ।

**प्र-११ कयोश्चित् द्वयोः टिप्पणी लेख्या ।** **०५**

१. एकादशेऽध्याये इन्द्रादिसुरैः भुवनैश्वर्याः देव्याः कृतं स्तवनम् ।

२. श्रीदुर्गासप्तशत्याः फलस्तुतिः ।

३. सुरथवैश्ययोः वरप्रदानम् ।

४. देव्याः स्वरूपम् ।

**प्र-१२ सप्तसु केषाञ्चित् पञ्चानां लघूत्तराणि लिखन्तु ।** **०५**

१. सरस्वतीदेव्याः ध्यानं कस्मिन् अध्याये वर्तते ?

२. नद्यः किं नाम ?

३. पुरन्दरस्य गजरत्नस्य किं नाम ?

४. कया देव्या हुङ्कारः कृतः ?

५. कुञ्जिकास्तोत्रे कयोः संवादः विद्यते ?

६. के हर्षनिर्भरमानसाः बभूवुः ?

७. दुर्गासप्तशती कस्मिन् पुराणे प्राप्नोति ?